दिनाङ्क :- 21.04.2026

प्रात: - 06:55

प्रधानमन्त्री-दक्षिणकोरियाः

भारत-दक्षिणकोरिया-देशौ आर्थिकसम्बन्धान् महत्त्वपूर्णतया गभीरं कर्तुं महत्त्वाकांक्षी मार्गचित्रं कल्पितवन्तौ अथ त्रिंशदुत्तर-द्विसहस्र-तमवर्षपर्यन्तं द्विपक्षीयव्यापारं पञ्चाशत्-अर्बुद-डॉलर-मितं यावत् वर्धयितुं घोषणां कृतवन्तौ । द्वयोः देशयोः अनेकक्षेत्रेषु सहकार्यार्थं चत्वारि विज्ञप्तिस्मारकानि अपि हस्ताक्षरितानि । उभयपक्षेण व्यापक आर्थिक-सहयोग-सन्धेः उन्नयनार्थं वार्तायाः पुनः आरम्भं कर्तुं संयुक्तघोषणायाः आदानप्रदानं कृतम् । ह्यः नवदिल्ल्यां प्रधानमन्त्री नरेन्द्रमोदी दक्षिणकोरियादेशस्य राष्ट्रपतिः ली जे म्युङ्ग् इत्यनयोर्मध्ये प्रतिनिधिमण्डलस्तरस्य वार्तायां हस्ताक्षरं कृत्वा विचाराणाम् आदानप्रदानं कृतम् । वार्तायाः अनन्तरं संयुक्तपत्रकार-विज्ञप्तौ प्रधानमन्त्री मोदी उक्तवान् यत् द्वयोः देशयोः द्विपक्षीयव्यापारः सप्तविंशतिः अर्बुद-डॉलर-मितं यावत् अभवत् ।

अस्मिन् अवसरे दक्षिणकोरियादेशस्य राष्ट्रपतिः म्युंगः अवदत् यत्, भारतं वैश्विकदक्षिणे अग्रणीरूपेण उद्भूतम् अस्ति । सः अवदत् यत्, अनिश्चिततायाः युगे परस्परवृद्धिं नवीनतां च प्रवर्धयितुं व्यापकसहकार्यस्य कृते देशद्वयमपि आदर्शरूपेण भवितुं शक्नोति ।

राष्ट्रपतिः - द्रौपदी मुर्मू -ओडिशा

राष्ट्रपतिः द्रौपदी मुर्मूः अद्य ओडिशा राज्यं गमिष्यति । अस्मिन्नवसरे राष्ट्रपतिः रौरकेलानगरे सार्वजनिककार्यक्रमे ग्रहालयस्य, विज्ञानकेन्द्रस्य, निर्मल-मुण्डा-परिवेशमार्गस्य च उद्घाटनं करिष्यति । राष्ट्रपतिः मुर्मूः रौरकेलानगरे आदिवासी-सङ्ग्रहालयस्य, एकीकृत-कमाण्ड-नियन्त्रण-केन्द्रस्य च उद्घाटनं करिष्यति ।

राजनाथ-जर्मनी भ्रमणः:

रक्षामन्त्री राजनाथ सिंहः अद्य आरभ्य भारत-जर्मनी देशयोः सामरिकरक्षा सहयोगम् अधिकं सुदृढं कर्तुं जर्मनीदेशस्य त्रिदिवसीय यात्रायाम् अस्ति। रक्षामन्त्रालयेन उक्तं यत्, एषा यात्रा वर्तमान रक्षासहकार्यपरिकल्पनानां समीक्षां कर्तुं, उभयदेशानां रक्षा-उद्योगानाम् मध्ये सहकार्यस्य नूतनानां मार्गाणां अन्वेषणस्य च अवसरं प्रदास्यति।

संस्कृतभारती-उद्घाटनम्

संस्कृतभाषायाः पुनरुत्थानार्थम् एवं वैश्विक-प्रसारार्थं समर्पितस्य संस्कृतभारत्याः नवनिर्मित-केंद्रीय-कार्यालयस्य 'प्रणव' इत्यस्य भव्यभवनस्य लोकार्पणं अक्षय तृतीयायाः पावन-अवसरे ह्यः प्रातः सम्पन्नमभवत् । राष्ट्रिय-राजधान्यां दिल्ल्यां स्थितस्य अस्य अत्याधुनिक-भवनस्य लोकार्पणं राष्ट्रीय स्वयंसेवक संघस्य सरसंघचालकस्य डॉ. मोहन भागवतस्य करकमलाभ्यां विधिवत् सम्पन्नम् । सभां सम्बोधयन् डॉ. मोहन भागवतः उक्तवान् यत् , संस्कृतम् भारतस्य प्राणः एव वर्तते । सः प्रोक्तवान् यत् अधुना दिल्ली संस्कृतस्य पुनर्जागरणस्य नूतनं केन्द्रं जातम् । संस्कृतं भारतस्य आत्मा इति वर्णयन् सः अवदत् यत् एषा केवलं भाषा

नास्ति, अपितु भारतस्य संस्कृतिः, परम्परा, जीवनदृष्टिकोणः इत्येतेषां च आधारः अस्ति ।

अस्मिन्नवसरे प्रधानमन्त्री श्रीनरेन्द्रमोदी स्व-अभिनन्दन-सन्देशे उक्तवान् यत् अक्षयतृतीयायाः पावन-अवसरे प्रणव-कार्यालयस्य लोकार्पणं अत्यन्त-हर्षदायकम् अस्ति । सः अवसत् यत् संस्कृतम् अतीतम् नास्ति अपि तु अस्माकं भविष्यमस्ति ।

अस्मिन्नवसरे केन्द्रीयमन्त्री निर्मला सीतारामन्, पूर्वकेन्द्रीय-मन्त्री अनुरागठाकुरः, संस्कृतभारत्याः अखिलभारतीय-अध्यक्षः प्रो. रमेशकुमार पाण्डेयः, भारतीयभाषासमितेः अध्यक्षः च मू कृष्णशास्त्री, संस्कृत-संवर्धन-प्रतिष्ठानस्य निदेशकः प्रो. चान्द किरण सलूजा अन्ये च गणमान्याः नेतारश्च उपस्थिताः आसन् ।

आईपीएल

आईपीएल क्रिकेट्-क्रीडायां, गतरात्रौ, मुम्बई-इण्डियन्स-दलेन गुजरात्-टाइटन्स्-दलं ऊनशतम्-धावनांकैः पराजितम् । अद्य सायं सार्धसप्तवादने, सन्-राईसस्-हैदराबाद अथ दिल्ली-केपिटल्स् दले सम्मुखीकरिष्यतः ।